GRAND ACADEMIC PORTAL
RESEARCH JOURNALS

GAP भाषा
A MULTILINGUAL JOURNAL OF RESEARCH
( ISSN – 2582-8770 )
Globally peer-reviewed and open access journal.

ज्ञान: अध्ययन: परम्परा

# समाजे पञ्चमहायज्ञानामावश्यकता

**डॉ. इतिश्री महापात्र**

संविदाध्यापिका (धर्मशास्त्रविद्याशाखा)
केन्द्रीयसंस्कृतविश्वविद्यालयः
एकलव्य-परिसरः
अगरतला,पश्चिमत्रिपुरा

विदितमिदं समेषां यत् सकलश्रुतीनामनुमापकत्वेन मुनिप्रणीतत्वेन तदध्ययनानुष्ठानवताम् ऐहिकामुष्मिकफलप्रापकत्वेन,पुरुषाणामुपादयत्वेन, सकलशास्त्रललामभूतत्वेन प्रधानपुरुषार्थस्य धर्मस्य प्रतिपादकत्वेन प्राचीनत्वेन च धर्मशास्त्रं विराजतेतराम् । तदेव धर्मशास्त्रं मुख्यतया भागत्रयेण विभक्तम् तद्यथा-आचारभागः, व्यवहारभाग,प्रायश्चित्तभागश्चेति। एतस्मिन् विभागत्रये षडविधस्मार्तधर्माः सम्यक् तया प्रतिपादिताः। तत्रापि स्मार्तधर्मेषु आश्रमधर्मस्य,आश्रमेषु गृहस्थधर्मस्य श्रेष्ठत्वं तथा पञ्चमहायज्ञैः प्रतिपादितम् ।

समाजस्य शृङ्खलार्थं हिरण्यगर्भेण ब्रह्मणा चत्वारः वर्णाः सृष्टाः। ते भवन्ति यथा-ब्राह्मणः,क्षत्रियः,वैश्यः,शूद्रश्चेति । सर्वेषां वर्णानां कृते चत्वारः आश्रमाः निर्दिष्टाः सन्ति । यथा-ब्रह्मचर्यम्,गृहस्थः,वानप्रस्थः,संन्यासश्चेति । शतायुर्वैपुरुषः इति वचनात् मानवजीवनं शतवार्षिकमिति पुरा लोकधारणा आसीत् । प्रत्येकस्य आश्रमस्य कृते पञ्चाविंशतिवर्षाणि कल्पितानि । अध्ययनात्मकः ब्रह्मचर्याश्रमः,सर्जनात्मकः गृहस्थाश्रमः,तपस्यात्मकःवानप्रस्थाश्रमः, योगात्माकस्तु संन्यासाश्रमः एव । धर्मशास्त्रेषु यद्यापि चतुर्णामाश्रमाणां विवेचन प्राप्यते,तथापि वेदेषु केवलं गृहस्थाश्रमस्य प्राशास्त्यं स्वीक्रियते । गृहस्थाश्रमः त्रिवर्गसाधनस्य क्षेत्रं मन्यते । दानं,यज्ञः अतिथिसत्कारश्चेत्यादि तस्य मुख्यं कर्त्तव्यमासीत् । गृहस्थामाश्रित्य सर्वे आश्रमिणः स्वस्वकार्यं संपादयितुं समर्थाः भवन्ति । सर्वे नद्यादयः जलाशयाः यथा सागरमुपतिष्ठन्ति । तेनैव प्रकारेण सर्वे आश्रमाः गृहस्थाश्रमे अन्तर्भवति । अतःगृहस्थामाश्रित्य अन्ये सर्वे आश्रमिणः जीवन्तीति मनुना उक्तम् । तद्यथा –[1]

**यथा वायुं समाश्रित्य सर्वे जीवन्ति जन्तवः।**
**तथा गृहस्थमाश्रित्य वर्तन्ते सर्व आश्रमाः॥**

**यथा नदीनदाः सर्वे सागरे यान्ति संस्थितिम् ।**[2]
**तथैवाऽऽश्रमिणः सर्वे गृहस्थे यान्ति संस्थितिम् ॥**

अतःगृहस्थ सर्वदा पञ्चमहायज्ञानामाचरयति । वैदिकयुगस्य धर्मकर्ममयजीवनेनित्यं पञ्चमहायज्ञानां सम्पादनस्य एका विलक्षणा परम्परा आसीत् । अस्य विधानं ब्राह्मणारण्यकगृह्यधर्मादिसूत्रेषु स्मृत्यादिग्रन्थेषु च वर्त्तते । जीवने नैतिकतासदाचारसद्व्यवस्थानां कृते एव एतेषां पञ्चमहायज्ञानां व्यवस्था आसीत् । श्रौतयज्ञापेक्षया अस्य सम्पादनविधिःसरला,सुगम्या च । यत्र श्रौतयज्ञे पुरोहितस्य आवश्यकता भवति,महायज्ञे न किमपि तस्य प्रयोजनम् । श्रौतयज्ञे गृहस्थः गौणः भवति अत्र च मुख्यः। श्रौतयज्ञस्य उद्देश्यं यत्र स्वर्ग-सम्पत्ति-पुत्रादीनां कामना भवति, तत्रैव पञ्चमहायज्ञस्य उद्देश्यं देवऋषिपित्रादिसकलानां जीवानां कृते स्वकर्त्तव्यस्य पालनं विद्यते । यजते इति यज्ञः,यज्+न प्रत्यये निष्पन्नः। महान् यज्ञः महायज्ञः। यज्ञः त्यागमूलकः त्यागवाची शब्दः। महायज्ञेषु सर्वेषां पोषणाय विविधप्रकाराणां त्यागादीनां विधानमस्ति । अस्मै प्रयोजनाय ब्रह्मचर्याश्रमे गृहीतानि विद्या,आचारः,स्वास्थ्यबलं च सोपयोगानि बभूवुः। एभिरेव गृहस्थः अधिकाधिकं धनं प्राप्नोति,तेन च यज्ञादिकं कर्म कृतवान् ।

वैदिकयज्ञपरम्परायां पञ्चमहायज्ञस्य महत्वपूर्ण स्थानम् अस्ति । गृहस्थानां कृते एव इमानि नित्यभूत कर्माणि सन्ति । ब्रह्म-देव-भूत-अतिथि-पितृ भेदेन पञ्चविधाः महायज्ञाः भारतीयजीवनपरम्परायां सुविदिताः सन्ति । अत्र परोपकारः एव महायज्ञानां मौलिकता वर्त्तते । महायज्ञेषु सर्वेषां पोषणाय विविधप्रकारणां त्यागानां विधानम् अस्ति । अस्य प्रयोजनाय ब्रह्मचर्याश्रमे गृहीतानि विद्याचारः स्वास्थ्यवलं च सोपयोगीनि बभूवुः। एभिरेव गृहस्थः अधिकाधिकं धनं प्राप्नोति स्म । तेन च यज्ञादिकं कर्म कृतवान् ।

मनुना प्रोक्तं च –[3]

**अध्यापनं ब्रह्मयज्ञः पितृयज्ञस् तु तर्पणम् ।**
**होमो दैवो वलिर् भैतो नृयज्ञोऽतिथिपूजनम् ॥**

## ब्रह्मयज्ञ

पञ्चमहायज्ञेषु प्रथमो भवति ब्रह्मयज्ञः। ब्रह्मयज्ञस्य अङ्गद्वयं विद्यते। वेदानामध्ययनं वेदानामध्यापनं च । अध्ययनशब्देन अध्यापनमपि कुल्लुकेन गृहीतम् । अतोऽध्यनमध्यापनञ्च ब्रह्मयज्ञः। शतपथब्रह्मणानुसारेण ब्रह्मयज्ञेन स्वर्गप्राप्ति र्भवति । देवाः ब्रह्मयज्ञेन प्रसन्न भूत्वास्वाध्यायिभ्यः विविधानभ्युदयान् प्रददति स्म । ब्रह्मयज्ञे व्यक्तिगताभ्युदयः समष्टिकल्याणं चान्तर्भूते स्तः । अत्र स्वाध्यायप्रवचनयोः निर्देशोऽस्ति । स्वाध्यायं न केवलं आर्याः अपितु आर्येतरा अपि कुर्वन्ति स्म । ब्रह्मचर्यपूर्वकं स्थित्वा पितामातागुरुप्रभृतिनां सेवा,तेषां आज्ञापरिपालनं,गुरोः सविधे विधिविधानपूर्वकं वेदपाठः अपि ब्रह्मयज्ञस्य अङ्गभूताः आसन् । ब्रह्मयज्ञेन स्वाध्यायप्रवचनादयो निदिश्यन्ते । ब्रह्मचर्याश्रमप्रकरणे स्पष्टं प्रतिभाति यत्,सदैव आचार्याः,निःशुल्केनैव वेदवेदाङ्गानां शिक्षां दद्युः। तत्र ब्रह्मयज्ञस्य स्वाध्यायपारायणस्वरुपं वर्णितम् । स्वाध्यायपारायणपरा एव आचार्याः आसन् ब्रह्मयज्ञसम्पादनाय एव आचार्या विद्यार्थिनः सम्मूहयन्ते स्म । ब्रह्मयज्ञस्य प्रतीकोऽधुना सन्ध्याविधौ गायित्रीमन्त्रपाठ एव वर्त्तते । नित्यं सन्ध्योपासना इदानीं ब्रह्मयज्ञत्वेन विधीयते । ब्रह्मचर्याश्रमे पठितानां वेदानामविस्मरणार्थं गृहस्थाश्रमेऽपि गृहस्थः प्रतिदिनं वेदाध्ययनं कुर्यात् । यथोक्तं याज्ञवल्क्येन-[4]

**वेदाथर्वपुराणानि सेतिहासानि शक्तितः ।**
**जपयज्ञप्रसिद्ध्यर्थं विद्यां चाध्यात्मिकीं जपेत् ॥**

गृहस्थः ब्राह्मणः अन्यान् वेदाध्यापनं कारयेत् । अध्यापनेन बुद्धिः प्रखरा भवति । तेनाधीतविषयाणां चाधिकाधिकं विमर्शनं भवति । संध्यावन्दनानन्तरं द्विजः प्रत्यहं वेदाध्ययनं कुर्यादिति नियमः विद्यते ।

**देवयज्ञः** – पञ्चमहायज्ञेषु द्वितीयो भवति देवयज्ञः । देवयज्ञस्यार्थः देवानां पूजनम् वा अग्नौ शास्त्रोक्तविधिना होमः देवयज्ञः ।

यथोक्तं मनुना –[5]

[1] मनु.स्मृ-3/77
[2] मनु.स्मृ-6/90
[3] मनु.स्मृः -3\70
[4] याज्ञ.स्मृ.-1/101
[5] मनु.स्मृः - 3/73

https://www.gapbhasha.org/

**अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते ।**
**आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ॥**

पारस्कराचार्यामतानुसारम् –

**वैश्वदेवादन्नात् पर्युक्ष्य स्वाहाकारैर्जुहुयात् ।**
**ब्रह्मणे प्रजापतये गृह्याभ्यः,कश्यपायानुमतय इति ॥**

देवानुद्दिश्य नित्यं होमयागादिकं वा यत् किञ्चित् कर्म क्रियते,तेन देवयज्ञः सम्पादितो भवति । कदाचित् देवानुद्दिश्य संस्कृताग्नौ आहुतिप्रदानं क्रियते । यथोक्तं बौधायनेन-[6] **अहरहः स्वाहा कुर्यादाकाष्ठात्तथैवं देवयज्ञ समाप्नोति ।**

## पितृयज्ञ

पञ्चमहायज्ञेषु तृतीयो भवति पितृयज्ञः । दिवं गतानां पितृपुरूषाणां कृते श्रद्धया तिलतर्पणादिकं यत्कर्म क्रियते, तदेव पितृयज्ञ इत्युच्यते । पितृपुरूषाणां प्रीतिनिमित्तं प्रत्येहं श्राद्धमवश्यमनुष्ठेयम् ।

यथोक्तं मनुना-[7]

**कुर्यादहरहः श्राद्धमन्नाद्येनोदकेन वा ।**
**पयोमूलफलैर्वापि पितृभ्यः प्रीतिमावहन् ।**

पितरस्तु देवतुल्याः भवन्ति । ये पितरः मृताः ते देवसदृशाः एव भवन्ति । शतपथब्राह्मणानुसारेण पितृणां तृप्तये स्वधया सह सोमहविर्जलादिकं समर्पणीयम्। पितृयज्ञेन स्वर्गलाभस्य सम्भावनाभिमता ।

पुरा भागवतपुराणे भगवतो मुखेन प्रोक्तम् –

**" सूर्योऽग्निर्ब्राह्मणो गावो वैष्णवः स्वं मरूज्जलम् ।**
**भूरात्मा सर्वभूतानि भद्रपूजापदानि वै ॥"**

स्मृतिकाराः पितृयज्ञं द्विधा विभजन्ति । तर्पणं पिण्डदानरूपं श्राद्धं च । पितृयज्ञे सोमप-अग्निष्वात्तादिरूपाः पितरःगृहस्थस्य वंशरक्षां कुर्वन्ति,समृद्धिमभिलषन्ति च । पुत्रादिभिः प्रदत्तानि अन्नजलादीनि श्राद्धीयद्रव्याणि च गृहीत्वा पितरः तृप्ताःसन्तःपुत्रादीनायुः,सन्तति,धनं,विद्यां,स्वर्गं,मोक्षं,सुखं च प्रयच्छन्ति । अत एव गृहस्थः इहलौकिक सर्वविधसुखफलप्राप्त्यर्थं पितृपुरूषान् जलदानेन पिण्डदानेन च सर्वथा सन्तोषयेत् । गृहस्थधर्मेषु श्राद्धं महत्त्वपूर्णं स्थानं लभते । वैदिककाले यथा पितृनुद्दिश्य पिण्डपितृयज्ञस्य प्रचलनमासीत् तथा तत्परवर्तिनि सूत्रकाले स्मृतिकाले च पिण्डदानस्य व्यवस्था प्राचलत् । यथा देवतोद्देश्येन द्रव्यत्यागो यागः तथा पितृद्देश्येन द्रव्यत्यागः श्राद्धमित्युच्यते । देवानुद्दिश्य क्रियमाणं दैवम् , पितृनुद्दिस्य क्रियमाणं कार्य पित्र्यम् ।

मुख्यतः श्राद्धं द्विविधम् । देवानुद्दिश्य क्रियमाणं दैवम् , पितृनुद्दिस्य क्रियमाणं कार्य पित्र्यम् । परन्तु याज्ञवल्क्यमतानुसारं श्राद्धं द्विविधम् यथा – पार्वणमेकोद्दिष्टञ्चेति । तत्र त्रिपुरूषोद्देशेन यत्क्रियते तत्पार्वणम् । एकपुरूषोद्देशेन क्रियमाणमेकोद्दिष्टम् । पुनश्च त्रिविधं यथा -नित्यं,नैमितिकं,काम्यञ्चेति । तत्र नित्यं नियतनिमित्तोपाधौ चोदितमहरहरमावस्याष्टकादिषु । अनियतनिमित्तोपाधौ चोदितं नैमित्तिकं यथा पुत्रजन्मादिषु । फलकामनोपाधौ विहितं काम्यं यथा स्वर्गादिकामनां कृत्तिकादिनक्षत्रेषु, तिथिषु च । पुनश्च पञ्चविधम् – 'अहरहः श्राद्धं पार्वणं वृद्धिश्राद्धमेकोद्दिष्टं सपिण्डीकरणं चे' ति ।

**भूतयज्ञः-** पञ्चमहायज्ञेषु भुतयज्ञो भवति चतुर्थयज्ञः । सर्वेषां जीवजातानां कल्याणकामनया दीयमानमन्नादिकं भूतयज्ञनाम्ना उच्यते । गृहस्थः विश्वदेवानुद्दिश्य अन्नदानं प्रत्यहमवश्यं कुर्यात् । "सर्वे सुखिनः सन्तु "इति हिन्दुनां धारणा सनातनी विद्यते ।

मनुः बलिविश्वदेवद्वारा सर्वेषां परितृप्तये बलिविधानं निर्दिशति । भूतयज्ञस्य माहात्म्यं मनुना विचारितम् –[8]

**शुनां च पतितानां च स्वपचां पापरोगिणाम् ।**
**वायसानां कृमीणां च शनकैर् निर्वपेद् भुवि ॥**

यथोक्तं याज्ञवल्क्येन –[9]

**देवेभ्यश्च हुतादन्नाच्छेषाद्भूतबलिं हरेत् ।**
**अन्नं भूमौ श्वचाण्डालवायसेभ्यश्च निक्षिपेत् ॥**

एवमुक्तप्रकारेण यः सर्वभूतान्यन्नदानादिना नित्यं पूजयति,स परमं स्थानं ब्रह्मात्मकं तेजमूर्त्ति प्रकाशम् अवक्रेण मार्गेण प्राप्नोति । ब्रह्मणि लीयत इत्यर्थः ।

यथोक्तं मनुना - [10]

**एवं यः सर्वभूतानि ब्राह्मणो नित्यमर्चति ।**
**स गच्छति परं स्थानं तेजोमूर्ति पथर्जुना ॥**

जीवेभ्यः करूणाभावप्रदर्शनार्थमयं यज्ञः शास्त्रेषु विहितः । भूतयज्ञस्य दार्शनिकः पक्षो यजमानमुखेन निर्दिष्टः –

**भूतानि सर्वाणि तथान्नमेतदहं च विष्णुर्न ततोऽन्यदस्ति ।**
**तस्मादहं भूतनिकायभूतमन्नं प्रयच्छामि भवाय तेषाम् ॥**
**चतुर्दशो भूतगणो य एव तत्र स्थिता येऽखिलभूतसंघाः ।**
**तृप्त्यर्थमन्नं हि मया विसृष्टं तेषामिदं ते मुदिता भवन्तु ॥**

**नृयज्ञः-**

यदा अध्ययनं समाप्ति भवति तदा स्नातकः गुरोः आज्ञया गृहं प्रति आगच्छति, वंशपरम्परानुसारेण रूपवत्या सुलक्षणया च कन्यया सह परिणयं करोति । समस्तकामनानां पूर्णकारकः आश्रमः भवति गृहस्थाश्रमः । गृहे आगतानां अतिथीनां स्वागत सत्कारः कर्त्तव्यः । वैदिककालादेव सदैवातिथियज्ञो लोकप्रियोऽभवत् । ऋग्वेदानुसारं केवलाघो भवति केवलादी ।

---

[6] बौधा. धर्मसूत्र.-2.6.4
[7] मनुस्मृतिः- 3/82
[8] मनु.स्मृ-3/92
[9] याज्ञ.स्मृ.-1/103
[10] मनु.स्मृ-3/93

https://www.gapbhasha.org/

तैतरीयोपनिषदि अपि अतिथिदेवस्य समुचितसत्कारस्य विधानं विद्यते । अभ्यागतानामतिथीनां विधिपूर्वकपूजनं मनुष्यायज्ञ इति । तत्रापि वैश्वदेवादन्नात् षोडशग्रासपरिमितं ग्रासचतुष्टयपरिमितं वा अन्नं विप्राय 'हन्त ते ' इति मन्त्रेण दद्यात् । कर्मण्यस्मिन् यः यथा अर्हति तदनतिक्रम्य भिक्षुकान् (परिव्राजकब्रह्मचारिप्रभृतीन्) अतिथीन् श्रोत्रियादीन् भिक्षाभोजनदानादिना तोषयेत् । प्रतिदिनं गृहस्थः भोजनात् प्राक् अतिथिभ्यः अन्नदानं कृत्वा तदनन्तरं स्वयमेव भुञ्जीत । आत्मनः प्रियद्रव्याणि अतिथेय श्रद्धापूर्वकं विनिवेदयेत् । पुनश्च – [11]

**न वै स्वयं तदश्नीयादतिथिं यन्न भोजयेत् ।**
**धन्यं यशस्यमायुष्यं स्वर्ग्यं चाऽतिथिपूजनम् ॥**

अतिथिःकालेऽकाले वा आगच्छेत् चेदपि तस्मै भोजनं दातव्यमेव ।

**एकरात्रं तु निवसन्नतिथिर् ब्राह्मणः स्मृतः ।**[12]
**अनित्यं हि स्थितो यस्मात् तस्मादतिथिरूच्यते ॥**

एकरात्रमेव परगृहे निवसन्ब्राह्मणोऽतिथिर्भवति । अनित्यावस्थानात्र विद्यते द्वितीया तिथिरस्येत्यतिथिरूच्यते । किञ्च –[13]
**अप्रणोद्योऽतिथिः सायं सूर्योढो गृहमेधिना ।**
**काले प्राप्तस् त्वकाले वा नाऽस्यानश्नन्गृहेवसेत् ॥**
अनेन कर्मणा गृहस्थः उत्तमां गतिं प्राप्नुयात् । शिलोञ्छवृत्तिकोऽपि ब्राह्मणोऽतिथियज्ञं करोत्विति मनुना निर्दिष्टम् ।
गृहस्थः ब्रह्मयज्ञानुष्ठानेनऋषिऋणात्,देवयज्ञानुष्ठानेन देवऋणात् , पितृयज्ञानुष्ठानेन पितृऋणात् मुच्यते इति शास्त्रोक्तिःवर्त्तते । भूतयज्ञ-मनुष्ययज्ञयोः अनुष्ठानेन गृहस्थः सर्वेषां प्रियो भवति । अतो गृहस्थः सर्वाश्रमिणां प्राणतुल्य इत्युक्तम् । इत्थं पञ्चमहायज्ञैः गृहस्थो न केवलं जीवितान् भूतान् उपकरोति अपि तु स्वर्गगतान् पित्रादीन् अपि तर्पणादिना तोषयति , यत् ऋषयः , पितरः , देवा अतिथयश्च गृहस्थेभ्यः सकाशात्प्रार्थयन्ते । अतः समाजस्योपकाराय शान्तिवर्द्धनाय गृहस्थ सर्वदा चिन्तयति । पञ्चमहायज्ञाः गृहस्थस्य कृते कर्त्तव्यस्य उदात्तभावनाः सर्वभूतदयायाः प्रेरणास्रोतस्वरूपाः भवन्ति इति ।

## सहायकग्रन्थसूची


[1] याज्ञवल्क्यस्मृतिः(मिताक्षरासहिता) – चौखम्बा संस्कृत प्रतिष्ठान
[2] मनुस्मृतिः- चौखम्बा सुरभारती प्रकाशन ,वाराणसी ,२०१० ।
[3] महाभारतम् – गीताप्रेस,गोरखपुर ।
[4] पारस्करगृह्यसूत्रम्- मार्गदर्शिनीटीकासहितम् ,संपा.कुलमणिमिश्रः , श्रीसदाशीवकेन्द्रीयसंस्कृतविश्वविद्यापीठम् , पुरी , ओडिशा -१९८१
[5] बौधायनधर्मसूत्रम् - चौखम्बा सुरभारती प्रकाशन ,वाराणसी - ११७२


https://www.gapbhasha.org/

[11] म.स्मृ.3/ 106
[12] म.स्मृ.3/102
[13] म.स्मृ.3/105